# Raghuvansha by Kalidas Chapter 4

# રઘુવંશં સર્ગઃ ૪ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha 4

File name : raghuvansha4.itx

Category : major_works, svara, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : May 11, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૪ કાલિદાસકૃતમ્

સ રાજ્યં ગુરુણા દત્તં પ્રતિપદ્યાધિકં બભૌ ।
દિનાન્તે નિહિતં તેજઃ સવિત્રેવ હુતાશનઃ ॥ ૪-૧॥

દિલીપાનન્તરં રાજ્યે તં નિશમ્ય પ્રતિષ્ઠિતમ્ ।
પૂર્વં પ્રધૂમિતો રાજ્ઞાં હૃદયેઽગ્નિરિવોત્થિતઃ ॥ ૪-૨॥

પુરુહૂતધ્વજસ્યેવ તસ્યોન્નયનપઙ્ક્તયઃ ।
નવાભ્યુત્થાનદર્શિન્યો નનન્દુઃ સપ્રજાઃ પ્રજાઃ ॥ ૪-૩॥

સમમેવ સમાક્રાન્તં દ્વયં દ્વિરદગામિના ।
તેન સિંહાસનં પિત્ર્યમખિલં ચારિમણ્ડલમ્ ॥ ૪-૪॥

છાયામણ્ડલલક્ષ્યેણ તમદૃશ્યા કિલ સ્વયમ્ ।
પદ્મા પદ્માતપત્રેણ ભેજે સામ્રાજ્યદીક્ષિતમ્ ॥ ૪-૫॥

પરિકલ્પિતસાંનિધ્યા કાલે કાલે ચ બન્દિષુ ।
સ્તુત્યં સ્તુતિભિરર્થ્યાભિરુપતસ્થે સરસ્વતી ॥ ૪-૬॥

મનુપ્રભુતિર્માન્યૈર્ભુક્તા યદ્યપિ રાજભિઃ ।
તથાપ્યનન્યપૂર્વેવ તસ્મિન્નાસીદ્વસુંધરા ॥ ૪-૭॥

સ હિ સર્વસ્ય લોકસ્ય યુક્તદણ્ડતયા મનઃ ।
આદદે નાતિશીતોષ્ણો નભસ્વાનિવ દક્ષિણઃ ॥ ૪-૮॥

મન્દોત્કણ્ઠાઃ કૃતાસ્તેન ગુણાધિકતયા ગુરૌ ।
ફલેન સહકારસ્ય પુષ્પોદ્ગમ ઇવ પ્રજાઃ ॥ ૪-૯॥

નયવિદ્ભિર્નવે રાજ્ઞિ સદસચ્ચોપદર્શિતમ્ ।
પૂર્વ એવાભવત્પક્ષસ્તસ્મિન્નાભવદુત્તરઃ ॥ ૪-૧૦॥

પઞ્ચાનામપિ ભૂતાનામુત્કર્ષં પુપુષુર્ગુણાઃ ।
નવે તસ્મિન્મહીપાલે સર્વં નવમિવાભવત્ ॥ ૪-૧૧॥

યથા પ્રહ્લાદનાચ્ચન્દ્રઃ પ્રતાપાત્તપનો યથા ।
તથૈવ સોઽભૂદન્વર્થો રાજા પ્રકૃતિરઞ્જનાત્ ॥ ૪-૧૨॥

કામં કર્ણાન્તવિશ્રાન્તે વિશાલે તસ્ય લોચને ।
ચક્ષુષ્મત્તા તુ શાસ્ત્રેણ સૂક્ષ્મકાર્યાર્થદર્શિના ॥ ૪-૧૩॥

લબ્ધપ્રશમનસ્વસ્થમથૈનં સમુપસ્થિતા ।
પાર્થિવશ્રીર્દ્વિતીયેવ શરત્પઙ્કજલક્ષણા ॥ ૪-૧૪॥

નિર્વૃષ્ટલઘુભિર્મેઘૈર્મુક્તવર્ત્મા સુદુઃસહઃ ।
પ્રતાપસ્તસ્ય ભાનોશ્ચ યુગપદ્વ્યાનશે દિશઃ ॥ ૪-૧૫॥

વાર્ષિકં સંજહારેન્દ્રો ધનુર્જૈત્રં રઘુર્દધૌ ।
પ્રજાર્થસાધને તૌ હિ પર્યાયોદ્યતકાર્મુકૌ ॥ ૪-૧૬॥

પુણ્ડરીકાતપત્રસ્તં વિકસત્કાશચામરઃ ।
ઋતુર્વિડમ્બયામાસ ન પુનઃ પ્રાપ તચ્છ્રિયમ્ ॥ ૪-૧૭॥

પ્રસાદસુમુખે તસ્મિંશ્ચન્દ્રે ચ વિશદપ્રભે ।
તદા ચક્ષુષ્મતાં પ્રીતિરાસીત્સમરસા દ્વયોઃ ॥ ૪-૧૮॥

હંસશ્રેણીષુ તારાસુ કુમુદ્વત્સુ ચ વારિષુ ।
વિભૂતયસ્તદીયાનાં પર્યસ્તા યશસામિવ ॥ ૪-૧૯॥

ઇક્ષુચ્છાયનિષાદિન્યસ્તસ્ય ગોપ્તુર્ગુણોદયમ્ ।
આકુમારકથોદ્ઘાતં શાલિગોપ્યો જગુર્યશઃ ॥ ૪-૨૦॥

પ્રસસાદોદયાદમ્ભઃ કુમ્ભયોનેર્મહૌજસઃ ।
રઘોરભિભવાશઙ્કિ ચુક્ષુભે દ્વિષતાં મનઃ ॥ ૪-૨૧॥

મદોદગ્રાઃ કકુદ્મન્તઃ સરિતાં કૂલમુદ્રુજાઃ ।
લીલાખેલમનુપ્રાપુર્મહોક્ષાસ્તસ્ય વિક્રમમ્ ॥ ૪-૨૨॥

પ્રસવૈઃ સપ્તપર્ણાનાં મદગન્ધિભિરાહતાઃ ।
અસૂયયેવ તન્નાગાઃ સપ્તધૈવ પ્રસુસ્રુવુઃ ॥ ૪-૨૩॥

સરિતઃ કુર્વતી ગાધાઃ પથશ્ચાશ્યાનકર્દમાન્ ।
યાત્રાયૈ ચોદયામાસ તં શક્તેઃ પ્રથમં શરત્ ॥ ૪-૨૪॥

તસ્મૈ સમ્યગ્ઘુતો વહ્નિર્વાજિનીરાજનાવિધૌ ।
પ્રદક્ષિણાર્ચિર્વ્યાજેન હસ્તેનેવ જયં દદૌ ॥ ૪-૨૫॥

સ ગુપ્તમૂલપ્રત્યન્તઃ શુદ્ધપાર્ષ્ણિરયાન્વિતઃ ।
ષડ્વિધં બલમાદાય પ્રતસ્થે દિગ્જિગીષયા ॥ ૪-૨૬ ॥

અવાકિરન્વયોવૃદ્ધાસ્તં લાજૈઃ પૌરયોષિતઃ ।
પૃષતૈર્મન્દરોદ્ધૂતૈઃ ક્ષીરોર્મય ઇવાચ્યુતમ્ ॥ ૪-૨૭ ॥

સ યયૌ પ્રથમં પ્રાચીં તુલ્યઃ પ્રાચીનબર્હિષા ।
અહિતાનનિલોદ્ધૂતૈસ્તર્જયન્નિવ કેતુભિઃ ॥ ૪-૨૮ ॥

રજોભિઃ સ્યન્દનોદ્ધૂતૈર્ગજૈશ્ચ ઘનસંનિભૈઃ ।
ભુવસ્તલમિવ વ્યોમ કુર્વન્વ્યોમેવ ભૂતલમ્ ॥ ૪-૨૯ ॥

પ્રતાપોઽગ્રે તતઃ શબ્દઃ પરાગસ્તદનન્તરમ્ ।
યયૌ પશ્ચાદ્રથાદીતિ ચતુઃસ્કન્ધેવ સા ચમૂઃ ॥ ૪-૩૦ ॥

મરુપૃષ્ઠાન્યુદમ્ભાંસિ નાવ્યાઃ સુપ્રતરા નદીઃ ।
વિપિનાનિ પ્રકાશાનિ શક્તિમત્ત્વાચ્ચકાર સઃ ॥ ૪-૩૧ ॥

સ સેનાં મહતીં કર્ષન્પૂર્વસાગરગામિનીમ્ ।
બભૌ હરજટાભ્રષ્ટાં ગઙ્ગામિવ ભગીરથઃ ॥ ૪-૩૨ ॥

ત્યાજિતૈઃ ફલમુત્ખાતૈર્ભગ્નૈશ્ચ બહુધા નૃપૈઃ ।
તસ્યાસીદુલ્બણો માર્ગઃ પાદપૈરિવ દન્તિનઃ ॥ ૪-૩૩ ॥

પૌરસ્ત્યાનેવમાક્રામંસ્તાંસ્તાઞ્જનપદાઞ્જયી ।
પ્રાપ તાલીવનશ્યામમુપકણ્ઠં મહોદધેઃ ॥ ૪-૩૪ ॥

અનમ્રાણાં સમુદ્ધર્તુસ્તસ્માત્સિન્ધુરયાદિવ ।
આત્મા સંરક્ષિતઃ સુહ્મૈર્વૃત્તિમાશ્રિત્ય વૈતસીમ્ ॥ ૪-૩૫ ॥

વઙ્ગાનુત્ખાય તરસા નેતા નૌસાધનોદ્યતાન્ ।
નિચખાન જયસ્તમ્ભાન્ગઙ્ગાસ્રોતોન્તરેષુ સઃ ॥ ૪-૩૬ ॥

આપાદપદ્મપ્રણતાઃ કલમા ઇવ તે રઘુમ્ ।
ફલૈઃ સંવર્ધયામાસુરુત્ખાતપ્રતિરોપિતાઃ ॥ ૪-૩૭ ॥

સ તીર્ત્વા કપિશાં સૈન્યૈર્બદ્ધદ્વિરદસેતુભિઃ ।
ઉત્કલાદર્શિતપથઃ કલિઙ્ગાભિમુખો યયૌ ॥ ૪-૩૮ ॥

સ પ્રતાપં મહેન્દ્રસ્ય મૂર્ધ્નિ તીક્ષ્ણં ન્યવેશયત્ ।

અઙ્કુશં દ્વિરદસ્યેવ યન્તા ગમ્ભીરવેદિનઃ ॥ ૪-૩૯॥

પ્રતિજગ્રાહ કાલિઙ્ગસ્તમસ્ત્રૈર્ગજસાધનઃ ।
પક્ષચ્છેદોદ્યતં શક્રં શિલાવર્ષીવ પર્વતઃ ॥ ૪-૪૦॥

દ્વિષાં વિષહ્ય કાકુત્સ્થસ્તત્ર નારાચદુર્દિનમ્ ।
સન્મઙ્ગલસ્નાત ઇવ પ્રતિપેદે જયશ્રિયમ્ ॥ ૪-૪૧॥

તામ્બૂલીનાં દલૈસ્તત્ર રચિતાપાનભૂમયઃ ।
નારિકેલાસવં યોધાઃ શાત્રવં ચ પપુર્યશઃ ॥ ૪-૪૨॥

ગૃહીતપ્રતિમુક્તસ્ય સ ધર્મવિજયી નૃપઃ ।
શ્રિયં મહેન્દ્રનાથસ્ય જહાર ન તુ મેદિનીમ્ ॥ ૪-૪૩॥

તતો વેલાતટેનૈવ ફલવત્પૂગમાલિના ।
અગસ્ત્યાચરિતામાશામનાશાસ્યજયો યયૌ ॥ ૪-૪૪॥

સ સૈન્યપરિભોગેણ ગજદાનસુગન્ધિના ।
કાવેરીં સરિતાં પત્યુઃ શઙ્કનીયામિવાકરોત્ ॥ ૪-૪૫॥

બલૈરધ્યુષિતાસ્તસ્ય વિજિગીષોર્ગતધ્વનઃ ।
મારીચોદ્ભ્રાન્તહારીતા મલયાદ્રેરુપત્યકાઃ ॥ ૪-૪૬॥

સસઞ્જુરશ્વક્ષુણ્ણાનમેલાનામુત્પતિષ્ણવઃ ।
તુલ્યગન્ધિષુ મત્તેભકટેષુ ફલરેણવઃ ॥ ૪-૪૭॥

ભોગિવેષ્ટનમાર્ગેષુ ચન્દનાનાં સમર્પિતમ્ ।
નાસ્રસત્કરિણાં ગ્રૈવં ત્રિપદીચ્છેદિનામપિ ॥ ૪-૪૮॥

દિશિ મન્દાયતે તેજો દક્ષિણસ્યાં રવેરપિ ।
તસ્યામેવ રઘોઃ પાણ્ડ્યાઃ પ્રતાપં ન વિષેહિરે ॥ ૪-૪૯॥

તામ્રપર્ણીસમેતસ્ય મુક્તાસારં મહોદધેઃ ।
તે નિપત્ય દદુસ્તસ્મૈ યશઃ સ્વમિવ સંચિતમ્ ॥ ૪-૫૦॥

સ નિર્વિશ્ય યથાકામં તટેષ્વાલીનચન્દનૌ ।
સ્તનાવિવ દિશસ્તસ્યાઃ શૈલૌ મલયદર્દુરૌ ॥ ૪-૫૧॥

અસહ્યવિક્રમઃ સહ્યં દૂરાન્મુક્તમુદન્વતા ।
નિતમ્બમિવ મેદિન્યાઃ સ્રસ્તાંશુકમલઙ્ઘયત્ ॥ ૪-૫૨॥

તસ્યાનીકૈર્વિસર્પદ્ભિરપરાન્તજયોદ્યતૈઃ ।
રામાસ્ત્રોત્સારિતોઽપ્યાસીત્સહ્યલગ્ન ઇવાર્ણવઃ ॥ ૪-૫૩ ॥

ભયોત્સૃષ્ટવિભૂષાણાં તેન કેરલયોષિતામ્ ।
અલકેષુ ચમૂરેણુશ્ચૂર્ણપ્રતિનિધીકૃતઃ ॥ ૪-૫૪ ॥

મુરલામારુતોદ્ધૂતમગમત્કૈતકં રજઃ ।
તદ્યોધવારબાણાનામયત્નપટવાસતામ્ ॥ ૪-૫૫ ॥

અભ્યભૂયત વાહાનાં ચરતાં ગાત્રશિઞ્જિતૈઃ ।
વર્મભિઃ પવનોદ્ધૂતરાજતાલીવનધ્વનિઃ ॥ ૪-૫૬ ॥

ખર્જૂરીસ્કન્ધનદ્ધાનાં મદોદ્ગારસુગન્ધિષુ ।
કટેષુ કરિણાં પેતુઃ પુંનાગેભ્યઃ શિલીમુખાઃ ॥ ૪-૫૭ ॥

અવકાશં કિલોદન્વાન્ રામાયાભ્યર્થિતો દદૌ ।
અપરાન્તમહીપાલવ્યાજેન રઘવે કરમ્ ॥ ૪-૫૮ ॥

મત્તેભરદનોત્કીર્ણવ્યક્તવિક્રમલક્ષણમ્ ।
ત્રિકૂટમેવ તત્રોચ્ચૈર્જયસ્તમ્ભં ચકાર સઃ ॥ ૪-૫૯ ॥

પારસીકાંસ્તતો જેતું પ્રતસ્થે સ્થલવર્ત્મના ।
ઇન્દ્રિયાખ્યાનિવ રિપૂંસ્તત્ત્વજ્ઞાનેન સંયમી ॥ ૪-૬૦ ॥

યવનીમુખપદ્માનાં સેહે મધુમદં ન સઃ ।
બાલાતપમિવાબ્જાનામકાલજલદોદયઃ ॥ ૪-૬૧ ॥

સઙ્ગ્રામસ્તુમુલસ્તસ્ય પાશ્ચાત્યૈરશ્વસાધનૈઃ ।
શાર્ઙ્ગકૂજિતવિજ્ઞેયપ્રતિયોધે રજસ્યભૂત્ ॥ ૪-૬૨ ॥

ભલ્લાપવર્જિતૈસ્તેષાં શિરોભિઃ શ્મશ્રુલૈર્મહીમ્ ।
તસ્તાર સરઘાવ્યાપ્તૈઃ સ ક્ષૌદ્રપટલૈરિવ ॥ ૪-૬૩ ॥

અપનીતશિરસ્ત્રાણાઃ શેષાસ્તં શરણં યયુઃ ।
પ્રણિપાતપ્રતીકારઃ સંરમ્ભો હિ મહાત્મનામ્ ॥ ૪-૬૪ ॥

વિનયન્તે સ્મ તદ્યોધા મધુભિર્વિજયશ્રમમ્ ।
આસ્તીર્ણાજિનરત્નાસુ દ્રાક્ષાવલયભૂમિષુ ॥ ૪-૬૫ ॥

તતઃ પ્રતસ્થે કૌબેરીં ભાસ્વાનિવ રઘુર્દિશમ્ ।
શરૈરુસ્રૈરિવોદીચ્યાનુદ્ધરિષ્યન્ રસાનિવ ॥ ૪-૬૬ ॥

વિનીતાધ્વશ્રમાસ્તસ્ય સિન્ધુતીરવિચેષ્ટનૈઃ ।
દુધુવુર્વાજિનઃ સ્કન્ધાઁલ્લગ્નકુઙ્કુમકેસરાન્ ॥ ૪-૬૭॥

તત્ર હૂણાવરોધાનાં ભર્તૃષુ વ્યક્તવિક્રમમ્ ।
કપોલપાટલાદેશિ બભૂવ રઘુચેષ્ટિતમ્ ॥ ૪-૬૮॥

કામ્બોજાઃ સમરે સોઢું તસ્ય વીર્યમનીશ્વરાઃ ।
ગજાલાનપરિક્લિષ્ટૈરક્ષોટૈઃ સાર્ધમાનતાઃ ॥ ૪-૬૯॥

તેષાં સદશ્વભૂયિષ્ઠાસ્તુઙ્ગા દ્રવિણરાશયઃ ।
ઉપદા વિવિશુઃ શશ્વન્નોત્સેકાઃ કોસલેશ્વરમ્ ॥ ૪-૭૦॥

તતો ગૌરીગુરું શૈલમારુરોહાશ્વસાધનઃ ।
વર્ધયન્નિવ તત્કૂટાનુદ્ધૂતૈર્ધાતુરેણુભિઃ ॥ ૪-૭૧॥

શશંસ તુલ્યસત્ત્વાનાં સૈન્યઘોષેઽપ્યસંભ્રમમ્ ।
ગુહાશયાનાં સિંહાનાં પરિવૃત્યાવલોકિતમ્ ॥ ૪-૭૨॥

ભૂર્જેષુ મર્મરીભૂતાઃ કીચકધ્વનિહેતવઃ ।
ગઙ્ગાશીકરિણો માર્ગે મરુતસ્તં સિષેવિરે ॥ ૪-૭૩॥

વિશશ્રમુર્નમેરૂણાં છાયાસ્વધ્યાસ્ય સૈનિકાઃ ।
દૃષદો વાસિતોત્સઙ્ગા નિષણ્ણમૃગનાભિભિઃ ॥ ૪-૭૪॥

સરલાસક્તમાતઙ્ગગ્રૈવેયસ્ફુરિતત્વિષઃ ।
આસન્નોષધયો નેતુર્નક્તમસ્નેહદીપિકાઃ ॥ ૪-૭૫॥

તસ્યોત્સૃષ્ટનિવાસેષુ કણ્ઠરજ્જુક્ષતત્વચઃ ।
ગજવર્ષ્મ કિરાતેભ્યઃ શશંસુર્દેવદારવઃ ॥ ૪-૭૬॥

તત્ર જન્યં રઘોર્ઘોરં પર્વતીયૈર્ગણૈરભૂત્ ।
નારાચક્ષેપણીયાશ્મનિષ્પેષોત્પતિતાનલમ્ ॥ ૪-૭૭॥

શરૈરુત્સવસંકેતાન્સ કૃત્વા વિરતોત્સવાન્ ।
જયોદાહરણં બાહ્વોર્ગાપયામાસ કિંનરાન્ ॥ ૪-૭૮॥

પરસ્પરેણ વિજ્ઞાતસ્તેષૂપાયનપાણિષુ ।
રાજ્ઞા હિમવતઃ સારો રાજ્ઞઃ સારો હિમાદ્રિણા ॥ ૪-૭૯॥

તત્રાક્ષોભ્યં યશોરાશિં નિવેશ્યાવરુરોહ સઃ ।

પૌલસ્ત્યતુલિતસ્યાદ્રેરાદધાન ઇવ હ્રિયમ્ ॥ ૪-૮૦॥

ચકમ્પે તીર્ણલૌહિત્યે તસ્મિન્પ્રાગ્જ્યોતિષેશ્વરઃ ।
તદ્ગજાલાનતાં પ્રાપ્તૈઃ સહ કાલાગુરુદ્રુમૈઃ ॥ ૪-૮૧॥

ન પ્રસેહે સ રુદ્ધાર્કમધારાવર્ષદુર્દિનમ્ ।
રથવર્ત્મરજોઽપ્યસ્ય કુત એવ પતાકિનીમ્ ॥ ૪-૮૨॥

તમીશઃ કામરૂપાણામત્યાખણ્ડલવિક્રમમ્ ।
ભેજે ભિન્નકટૈર્નાગૈરન્યાનુપરુરોધ યૈઃ ॥ ૪-૮૩॥

કામરૂપેશ્વરસ્તસ્ય હેમપીઠાધિદેવતામ્ ।
રત્નપુષ્પોપહારેણ છાયમાનર્ચ પાદયોઃ ॥ ૪-૮૪॥

ઇતિ જિત્વા દિશો જિષ્ણુર્ન્યવર્તત રથોદ્ધતમ્ ।
રજો વિશ્રામયન્રાજ્ઞાં છત્રશૂન્યેષુ મૌલિષુ ॥ ૪-૮૫॥

સ વિશ્વજિતમાજહ્રે યજ્ઞં સર્વસ્વદક્ષિણમ્ ।
આદાનં હિ વિસર્ગાય સતાં વારિમુચામિવ ॥ ૪-૮૬॥

સત્રાન્તે સચિવસખઃ પુરસ્ક્રિયાભિ-
ર્ગુર્વીભિઃ શમિતપરાજયવ્યલીકાન્ ।
કાકુત્સ્થશ્ચિરવિરહોત્સુકાવરોધાન્
રાજન્યાન્સ્વપુરનિવૃત્તયેઽનુમેને ॥ ૪-૮૭॥

તે રેખાકુલિશાતપત્રચિહ્નં
સમ્રાજશ્ચરણયુગં પ્રસાદલભ્યમ્ ।
પ્રસ્થાનપ્રણતિભિરઙ્ગુલીષુ ચક્રુ-
ર્મૌલિસ્રક્ચ્યુતમકરન્દરેણુગૌરમ્ ॥ ૪-૮૮॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
રઘુદિગ્વિજયો નામ ચતુર્થઃ સર્ગઃ ॥

---

Encoded and proofread by Arvind Kolhatkar akolhatkar at rogers.com

---

*Raghuvansha by Kalidas Chapter 4*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*